## (624) " ज्ञप मारणतोषणनिशामनेषु "

( X-चुरादिः-1625. सक. सेट्. उभ. मित्. )

' जानातीति श्नि सिद्ध्येत्, ज्ञपयति तु पुनर्मारणादौ घटादेः
णौ(चौ) मित्त्वेऽपीदमेव ' ज्ञप मिद् ' [ज्ञपनम्] इति पदं ज्ञापने मारणादौ ।
तेनार्थाज् ज्ञापनेऽर्थे ज्ञपयतिपदवज् ज्ञापयेदित्यपि स्याद्
उक्तस्योक्तिः 'णिचश्च' (१-३-७४) त्युदितविहतये ; ज्ञापयेज् 'ज्ञा नियोगे ॥'
(श्लो. 8) इति देवः ।

अत्र क्षीरस्वामी घटादौ ' मारणतोषणनिशानेषु ज्ञा ' इति, चुरादौ ' ज्ञप मारणतोषणनिशानेषु मिच्च ' इति चापठत् । पशुं संज्ञपयति, विष्णुं विज्ञपयति, शस्त्रं प्रज्ञपयति, इति क्रमेणोदाजहार च । मारणाद्यर्थेषु ज्ञपधातोः पुनर्मित्त्वविधानं व्यर्थमित्याशङ्क्य, स्वार्थे णिचि, एष्वर्थेषु मित्त्वसिद्धिः फलमिति, चुरादिण्यन्तेभ्यः कर्तृगामिन्यपि क्रियाफले परस्मैपदमेव भवतीति चाभिहितवान् । एवञ्च सति, ' प्रच्छ ज्ञीप्सायाम् ', 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' (1-4-34) इत्यादिषु क्रमेण ज्ञानज्ञापनार्थयोः प्रतीयमानत्वात्, वृत्तिन्यासपदमञ्जर्यादिभिस्तथैवाभ्युपगतत्वात् तत्र च मित्त्वप्रयुक्तकार्याणां दर्शनाच्च, क्षीरस्वामिमते तयोः प्रयोगयोरसङ्ग्रहः स्यात् । तदर्थं माधवीयधातुवृत्त्यादिबहुग्रन्थानुरोधेनात्र ' ज्ञप मिच्च ' इत्येव पाठः प्रामाणिकः । यथाप्रयोगं ज्ञाने, ज्ञापने च ज्ञपधातुर्मिद् भवतीति सूत्रार्थः । अत एव सिद्धान्तकौमुद्याम् ' अयं धातुर्ज्ञाने, ज्ञापने च ' इत्येवोक्तम् । घटादौ ' निशामनेषु ' इति पाठेन चाक्षुषज्ञानव्यतिरिक्तेऽर्थे मित्त्वाभावः प्रतीयते । अत्र च बोधने मित्त्वं बोध्यते । एवञ्च, विज्ञापयति, विज्ञपयति इति रूपद्वयस्यापि साधुत्वं बोध्यम् । ' तज्ज्ञापयत्याचार्यः ' (महाभाष्यम्), 'विज्ञापना भर्तृषु सिद्धिमेति ।' इत्यादिप्रयोगेषु न काऽप्यनुपपत्तिः । अत एव पुरुषकारे (श्लो. 8) ' एवञ्च, ' ज्ञप मिच्च ' इत्येव पाठो युक्ततमः । ' इत्युक्तं सङ्गच्छते ॥

[1]ज्ञपकः-पिका, जिज्ञपयिषकः-षिका, —

---

1. मित्संज्ञकत्वादस्य धातोर्णौ परत उपधाया वृद्धौ, ' मितां ह्रस्वः ' (6-4-92) इति ह्रस्वः । एवं सर्वत्र ज्ञेयम् ।